


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2017; 3(8): 616-619
www.allresearchjournal.com
Received: 15-06-2017
Accepted: 16-07-2017

**ईशिता हाजरा**
वर्धमान विश्वविद्यालये गवेषणारता,
राजस्थान, भारत

# वैदिकसाहित्ये परिवेशचेतना

**ईशिता हाजरा**

**सारसंक्षेप**
साहित्यं समाजदर्पणस्वरूपम्। यद्यपि वैदिकसाहित्यस्य अपौरषेयत्वं स्वीकृतम् तथापि वैदिकसाहित्ये जीवनमुखी परिवेशचेतना दृश्यते। वैदिकऋषयः वास्तवदृष्टिसम्पन्नाः। वैदिकयुगे प्रकृतिम् अधिकृत्य तेषां देवभावना प्रतिष्ठिता। प्रकृतेः विविधोपादानानाम् उपरि देवत्वम् आरोपितम्। तत्रक्षणाय विविधकर्म कर्तव्यरूपेण ऋषिणा निर्दिष्टम्। देवभावनायाः अन्तराले परिवेशचेतना वैदिकसाहित्ये सूक्ष्मरूपेण अनुप्रविष्टा।

**कूट शब्दः** वैदिकसाहित्ये परिवेशचेतना, साहित्यं समाजदर्पणस्वरूपम्

**प्रस्तावना**
साहित्यं मानवजीवनस्य दर्पणस्वरूपम्। तत् न कदापि मानवजीवनम् तथा च मानवकर्मधारां सम्पूर्णरूपेण उपेक्षीकृत्य प्रवर्तते। मानवेतिहासे वैदिकसाहित्यम् एव प्राचीनतमम्। यद्यपि वैदिकसाहित्यस्य अपौरषेयत्वं स्वीकृतम् तथापि वैदिकसाहित्ये मानवजीवनस्य धारा प्रतिफलिता। तत्र वैदिकमन्त्राणाम् अन्तराले प्रकृतिना सह मानवजीवनसम्पर्कः अपि दृश्यते। प्रकृतिम् अधिकृत्य एव वेदे देवभावना प्रतिष्ठिता इति विश्वासः। तत्र न केवलम् पृथिवीस्थानगतदेवता अपि च द्युलोकस्थानगता देवता, अन्तरीक्षस्थानगता देवता अपि स्तूयन्ते। स्तवस्तुतिनाम् अन्तराले प्रकृतिरक्षणाय प्रयासः वैदिकसाहित्ये लक्ष्यते।
वैदिकयुगे ऋषिकविना प्रकृतेः विविधशक्ति-उपादानानाम् उपरि देवत्वम् आरोपितम्। अग्निः पृथिवीस्थानगतमुख्यदेवतारूपेण स्तूयते। न केवलम् अग्निः पृथिवीस्थानगता वनस्पति-नदी-अपादि उपकारणम् अपि स्तूयते। श्वेताश्वतर-उपनिषदि अपि श्रूयते-

> यो देवोऽग्नौ योऽप्सु
> यो विश्वं भुवनाविवेश
> य ओषधिषु यो वनस्पतिषु
> तस्मै देवाय नमो नमः।१

**पृथिवी** - पृथिवी सर्वकर्मणाम् आश्रयस्वरूपा। पृथिवीसूक्ते श्रूयते ;

> ‘सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणातु।’२

पृथिवीप्रति कृतज्ञतावशात् वेदे अपि श्रूयते ;

> ‘जनं विभ्रती वहुधा विवाचसं नानाधर्माणं पृथिवी यथौसकम्
> सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुवनपस्फूरन्ती।’३

प्रकृतिना मानवकर्म नियन्त्रितम्। तैत्तिरीय-आरण्यके श्रूयते-

**Correspondence**
**ईशिता हाजरा**
वर्धमान विश्वविद्यालये गवेषणारता,
राजस्थान, भारत

'गन्धद्वारम दूरधर्शाम नित्यपुस्ताम करिष्यिनिम
ईश्वरीं सर्वभूतानां ताम इहोपाह्वयते श्रियम्।।'४

जीवनधाराचक्रावर्तनम् ऐतरेय-ब्राह्मणे श्रूयते-

'यदिदं अन्नं अन्नादम इयम एव पृथिवीतो
इदं सर्वं उत्तिष्ठति यदिदं किमश्च।।'५

वृहदारण्यके अपि श्रूयते - 'इयं पृथिवी सर्वेषाम् भूतानां माध्वास्यै सर्वाणि भूतानि मधु'। प्रकृतेः उपकरणेन सह वैदिकऋषिणाम् आत्मिकयोगः स्थापितः। अतः पृथिवीस्थविविधोपकरणम् ऋषिणा स्तुतम्।

**क) मृत्तिका** - भूमिः जननीसदृशा। अतः भूमिखननम् न करणीयम्। खनिजाहरणानन्तरम्। भूमिपूर्णकरणम् अवश्यकर्तव्यम्। श्रूयते च अथर्ववेदे।

'यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु।
मा ते मम विमृग्वरि मा ते हृदयमर्पितम्।।'६

अपि च कृष्णयजुर्वेदे श्रूयते-

'सं ते वायुद्मातविश्वार्दधातूत्तनायै हृदयं यद्विलिष्टम्।
देवानां यश्चरति प्राणयेन तस्मै च देवी वभवस्तु तुभ्याम्।
सुजातो ज्योतिषाशर्म वरुमाऽसदः सुवः।'७

**ख) जीववैचित्र्यम्** - जीववैचित्र्यसंरक्षणे वैदिकानां प्रयासः दृश्यते।

'देवी स्वस्तिर अस्त नः स्वस्तिर्मानुसेव्यय
ऊर्ध्वं जिगातु भेषजम् शम नो
अस्त द्विपदे शम चतुस्पदे।'८

अथर्ववेदे अपि श्रूयते - 'इहैतु सर्वो यः पशुरस्मिन् तिष्ठतु या रयि।'९ वैदिकयुगे यागकर्मणि पशुहत्या दृश्यते किन्तु धर्मोद्देश्ये पशुहननम् कृतम्। पशुः सम्पद्रूपेण स्वीकृतः। ऋग्वेदे अपि श्रूयते-

'गोमा अग्नेह विमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः
इल, वाँ एषो असुर प्रजावान् दीर्घरयि पृथुवध्न सभावान्।'१०

**ग) अरण्यानि** - अरण्यम् एव परिवेशस्य गुरुत्वपूर्णोपादानः। वैदिकऋषिणा उक्तम् - यदिदं किञ्चित् जगत् सर्वं प्राण एजति निःसृतम्। वैदिकऋषिणां वासभूमिः वृक्षाछोदितम् अरण्यम्। अरण्यजातफलेन तेषां क्षुधा निवृत्ता अरण्यजातकाष्ठेन यज्ञः सम्पादितः च। अरण्यजातासम्पद् तैः अतिश्रद्धया गृहीता। अरण्याच्छन्नपरिवेशे वेदः अपि प्रकाशितः। अतः वैदिकसाहित्ये वृक्षसम्पर्कीतभावना दृश्यते। उषधीरूपेण वृक्षाः व्यवहृयते। शुक्लयजुर्वेदे अपि श्रूयते-

'अवपतन्तीरवदन्दिव ओषधयस्परि
यं जीवमश्नवामहै न स रिष्यति पुरुषः।'११

उषधीरूपेण वृक्षस्य स्तुतिः अपि दृश्यते-
'शतं वो अम्व धामानि सहस्रमुत वो रुहः
अधा शतक्रत्वो यूयमिमं से अगदं कृत।।'१२

ऋषिणां तपोवने वृक्षसम्पद् सयत्नेन लालिता।

**घ) आपः** - वेदे आपः जलदेवतारूपेण उपस्थापिताः। सा जननीसमा। सृष्टिपूर्वे अपाम् अस्तित्वम् स्वीकृतम्। नासदीयसूक्ते श्रूयते-

'तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वसा इदम्।'१३

अप्प्रशस्तिप्रसङ्गे वेदे अपि श्रूयते-

'तस्या समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः
तत क्षरत्यक्षं तद्विश्वमुप जीवति।।'१४

जलम् सुखस्य आधाररूपम्, जननीसदृशम् च -

'आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे
यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।'१५

आपः ओषधिदात्र्यः 'अपो याचामि भेषजम्'।

अथर्ववेदस्य पृथिवीसूक्ते पृथिव्या सह अप्महिमा श्रूयते-

'यस्यां समुद्र उत् सिन्धुरापो यस्यामन्नं कृष्टयः सम्भभुवुः।
यस्यामिदं जिन्वति प्राणदेजत् सा नो भूमिः दधातु।'१६

आपः अक्षरिक्षजाताः भूमिप्रवाहिताः, समुद्राभिमुखे धाविताः च।

'या आपो दिव्या उत वा स्रवन्ति उत वा यः स्वयंजाः।
समुद्रार्था या शुचय पावकास्ता आदौ देवारिह मामवन्तुः।'१७

जलमध्ये अमृतम् भेषजम् च अस्ति।

'अपस्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये।'१८

**अपि श्रूयते**

'पय पृथिवीव्यां पय उषधीषु पयो दिव्यन्तरिक्षे पयो धाः
पयस्वतीः प्रदिश सन्तु मह्यम्।'१९

अतः जलविशुद्धतारक्षणाय, जलदूषणप्रतिरोधााय वैदिकऋषयः सदा सचेष्टाः। जलविशुद्धतारक्षणाय तैत्तिरीय-आरण्यक श्रूयते-

'यद्च अपाम् क्रुरम् यद् अमेध्यम् यद् अशान्तम् तद् अपगच्छतात्।
'२०

**अग्निः** - वैदिकसाहित्ये अग्निः पृथिवीस्थानगतदेवतारूपेण स्तुतः। न केवलम् पृथिवीस्थानगतदेवतारूपेण अपि च द्युलोकस्थानगतदेवतारूपेण अग्निः अपि स्तुतः। द्युलोके अग्निः सविता इति उपस्थापितः। वैदिककाले अग्नेः सर्वव्यापित्वम् स्वीकृतम्। श्रूयते च वेदे -

'ये अग्नयो अप्स्वन्तर्थे वृत्रे ये पुरुषे ये अश्मसु।
य आविवेशोषधीर्यो वनस्पतींस्तोभ्यो अग्निभ्यो हुतमस्त्वेतत्।।'२१

ऋग्वेदस्य प्रथममण्डलस्य प्रथममन्त्रे अग्निस्तुतिः लक्ष्यते -

'अग्निमीले पुरोहितं, यज्ञस्य देवमृत्विजम्
होतारं रत्नधातमम्।।'२२

अग्निः शक्तुयाधाररूपेण स्वीकृतः। अतः वैदिकऋषिभिः अग्निहोत्रयागादिरचितः रक्षितः च।

'सपर्येण्य स प्रियो विक्ष्वग्निर्होता मन्त्रोनि षसादा यजीयान्।
त्वं त्वा वयं दम आ दीदिवांसमुप ज्ञुवाधो नमसा सदेम।।'२३

सौरशक्तिनां व्यवहारप्रसङ्गे ऋनग्मन्त्रे अपि श्रूयते-

"अनागसो अदितये देवस्य सवितुः सवे। विश्वा वामानि धीमहि।"२४

अपि श्रूयते-

'वाजस्य नु प्रसवे मातरं महीमदितिं नाम वचसा करमहे।
यस्यादिमं विश्वं भुवनमाविवेश तस्या नो देवः सविता धर्म साविषत्।।
'२५

अतः स्वदेहे मनासि च तेजशक्तिप्रकाशयनाय वैदिकऋषिणां प्रार्थना श्रूयते - 'तेजसि तेजो महि धेहि।'२६

**वायुः** - ऋग्वेदे वायुः देवतारूपेण उपस्थापितः। ऋग्मन्त्रे श्रूयते -

'वायो उक्थेभिर्जरन्ते त्वामच्छा जवितार
सुतसोमा अहर्विदः।'२७

तैत्तिरीयपनिषदि वायुः ब्रह्मरूपेण उपस्थापितः। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि सत्यं वदिष्यामि। २८ वेदे वायुः जीवनधारणस्य अपरिहार्योपादानरूपेण स्वीकृतः।

'प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते।
प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्।'२९

जीवमण्डलं वायुसमुद्रे निमज्जितम्। वायोः प्रमत्तरूपाणां प्रकाशः वेदे श्रूयते। प्रमत्तवायुना वृक्षादिः उत्पाटितः वनादिः विमर्दितः सर्वोपरि पृथिवी कम्पिता च।
ऋग्मन्त्रे अपि श्रूयते-

'नि वो यामाय मानुषो द्रध्र उग्र उग्राय मन्यवे। जिहीत पर्ततो गिरिः।
'३०

वायुप्रवाहस्य भयावहता अपि ऋग्मन्त्रे श्रूयते-
'अध स्वनामरुतां विश्वमा सद्म पार्थिवम्
अरेजन्त प्र मानुषाः।'३१

अनुरूपेण वायोः शान्तरूपस्य वर्णना ऋग्मन्त्रे दृश्यते। मृदुमन्दप्रवाहितवायुना पृथिवी सौन्दर्यमन्डिता-

'वो विश्ववः श्रीरधि तनूषु पिपिषे।३२
अपि च श्रूयते-'एवं शुभं यातामनु रथा आवृत्त्।'३३

वायुसम्पर्किता आधुनिकविज्ञानसम्मतचिन्ता अपि वेदे लक्ष्यते। समुद्रात् आह्वतजलीयवाष्पेन वृष्टिः जायते इति भावना वेदे श्रूयते - 'उदीरयथा मरुतः समुद्रतो यूयं वृष्टिवर्षयया पुरीषिणः।'३४
अपि च श्रूयते-

महान्तं कोशमुदचाभि सिंचि सविद्युतं भवतु धातु वातः।
तन्वतां यज्ञं वहुधा विवृष्टा आनन्दिनीरोषधयो भवन्तु।३५

जीवनधारणकर्मणि वायोः अपरिहार्यता वेदस्वीकृता। वायुना जलकणा वाहिता। अतः सः 'अपाम् सखा'। सः 'ऋतवा' 'प्रथमजा' इति विशेषनेन भूषितः।

वायुप्रवाहेण जलचक्रम् अव्याहतम्।

'अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः।
अपां सखा प्रथमजा ऋतवा क्व स्विज्ञातः कत आ वभूव।।'३६

**उपसंहार-**
वैदिकपरिवेशः वर्तमानयुगवत् न दूषणजर्जरितः। अतः परोक्षरूपेण परिवेशरक्षणाय प्रयासः वैदिकसाहित्ये प्रतिफलितः। प्रकृतेः विविधोपादानानाम् उपरि देवत्वम् आरोपितम्। देवभावनायाः अन्तराले परिवेशचिन्ता वैदिकसाहित्ये परोक्षरूपेण उपस्थापिता। प्राकृतिकसम्पदः मलिनतारक्षणाय विविधाः मन्त्राः श्रूयन्ते। महानारायणोपनिषदि अपि श्रूयते-

'मातृके प्रतिष्ठिते सर्वं जन्मे निर्णयुद मृत्तिके
त्वया हतेन पापेनागछोमि परमां गतिम्।'३७

देवभावनान्तराले वैदिकाः प्रकृतिरक्षणाय तत्पराः, वैदिकसाहित्ये तेषां भावनायाः प्रतिफलनम् अपि दृश्यते।

**पादटीका -**
1. श्वेताश्वतर उपनिषद् २/१७ ।
2. अथर्ववेद १२/१/१।
3. अथर्ववेद १२/१/४५।
4. तैत्तिरीय आरण्यक ६/१/३५।
5. ऐतरेय आरण्यक २/१/२।
6. अथर्ववेद १२/१/३५।
7. कृष्णयजुर्वेद ४/१/४१।
8. तैत्तिरीय आरण्यक १/१०/११।
9. अथर्ववेद १/४/२।
10. ऋग्वेद ४/२/५।
11. शुक्लयजुर्वेद १२ अध्याय, मन्त्र ९१।

12. शुक्लयजुर्वेद १२ अध्याय, मन्त्र ७६।
13. ऋग्वेद १०/१२९/३।
14. ऋग्वेद १/१६४/४२।
15. ऋग्वेद १०/९/१।
16. अथर्ववेद १२/१/३।
17. ऋग्वेद ७/४९/२।
18. ऋग्वेद १/२३/१९।
19. शुक्लयजुर्वेद १८/३३।
20. तैत्तिरीय आरण्यक ६/१/४१।
21. अथर्ववेद ३/५/११।
22. ऋग्वेद अग्निसूक्त १/१/१।
23. ऋग्वेद ६/१/६।
24. ऋग्वेद ५/८२/६।
25. शुक्लयजुर्वेद १८/३०।
26. यजुर्वेद संहिता १९/९।
27. ऋग्वेद १.२.२।
28. तैत्तिरीय उपनिषद् (शीक्षावली) १/१।
29. अथर्ववेद १२/२/५/५।
30. ऋग्वेद १/३७/७।
31. ऋग्वेद १/३८/१०।
32. ऋग्वेद ५/५७/६।
33. ऋग्वेद ५/५५/३।
34. ऋग्वेद ५/५५/५।
35. अथर्ववेद ४/३/५/१५।
36. ऋग्वेद १०/१६८/३।
37. महानारायण उपनिषद् १/४०।
38. अनिर्वाण वेदमीमांसा संस्कृत पुस्तक भाण्डार, २००६।
39. गुप्त, शुभेन्दु अति इच्छार सङ्कटदेश १२ संख्या १८ एप्रिल २००३।
40. गोस्वामी, विजनविहारी अथर्ववेदसंहिताहरफ प्रकाशनी, कोलकाता २०१३।
41. गोस्वामी, विजनविहारी यजुर्वेदसंहिता हरफ प्रकाशनी, कोलकाता २०१३।
42. चक्रवर्ती, सोमदत्ता वैदिकसाहित्य प्रसङ्ग संस्कृत वुक डिपो, कलकाता २०००।
43. ठाकुर, परितोष सामवेदसंहिता हरफ प्रकाशनी २००१।
44. वन्दोपाध्याय, हिरन्मय ऋग्वेदसंहिता हरफ प्रकाशनी, (प्रथम खण्ड, कोलकाता, २०१३ द्वितीय खण्ड)
45. वसु, योगीराज वेदेर परिचय के.एल.एम् प्राइभेट लिमिटेड
46. मुखोपाध्याय, दिलीप शुक्लयजुर्वेदसंहिता अक्षय लाइब्रेरी, कलकाता २०१३।
47. सेन, अलोक कुमार उपनिषद्समग्र नारायण पुस्तकालय, कलकाता २००७।